हस्ते, व्य, पाणौ । यथा । हस्ते करोति । इति मुग्धबोधव्याकरणम् ॥

हस्तेकरणं, क्ली, पाणिग्रहणम् । विवाहः । इति केचित् ॥

हस्त्यः, त्रि, ( हस्त+"तेन यथाकथाचहस्ताभ्यां णयतौ ।" ५ । १ । ९८ । इति यत् । ) हस्तेन दत्तः । हस्तेन कृतः । इति सिद्धान्तकौमुदी ॥

हस्त्यध्यक्षः, पुं, ( हस्तिषु अध्यक्षः ) गजाध्यक्षः । तल्लक्षणं यथा,—

"हस्तिशिक्षाविधानज्ञो वन्यजातिविशारदः ।
क्लेशक्षमस्तथा राज्ञो गजाध्यक्षः प्रशस्यते ॥"
इति मात्स्ये १८९ अध्यायः ॥

हस्त्यायुर्व्वेदः, पुं, ( हस्तिनः आयुर्व्वेदः ।)गजायुर्व्वेदः । हस्तिचिकित्साशास्त्रम् । तत्प्रमाणं हस्तिशब्दे द्रष्टव्यम् ॥

हस्त्यारोहः, पुं, ( हस्तिनमारोहतीति । आ+रुह+कः । ) हस्तिपकः । इत्यमरः ।२।८।५९॥ तल्लक्षणं यथा,—

"एतैरेव गुणैर्युक्तः स्थासनश्च विशेषतः ।
गजारोहो नरेन्द्रस्य सर्व्वकर्म्मसु शस्यते ॥"
एतैर्हस्त्यध्यक्षगुणैः । इति मात्स्ये १८९ अः ॥

हसः, त्रि, ( हसति निरर्थकमिति । हस+"स्फायितञ्चीति ।" उणा० २ । १३ । इति रक् । ) मूर्खः । इत्युणादिकोषः ॥

हहलं, क्ली, हालाहलम् । इति शब्दचन्द्रिका ॥

हहाः, पुं, हाहानामगन्धर्व्वः । इति शब्दमाला ॥

हा, ओ लि त्यागे । इति कविकल्पद्रुमः ॥ (ह्वा०-पर०-सक०-अनिट् । ) ओ हाक त्यागे इति प्रसिद्धोयम् । यत्र हाक इति ग्रहणं तत्रास्यैव । तेन दामा गे हाक इत्यादि सूत्रेणास्य हीयते इत्यादि । अन्यस्य हायते इत्यादि । ओ हीनः । लि जहाति । अकर्म्मकश्चायम् । यथा । स्वार्थाद्धीनः । एवं जहाति अपैति स्वार्थो यस्यामिति जहत्स्वार्था वृत्तिः । इति दुर्गादासः ॥

हा,ओ ङ लि गतौ । इति कविकल्पद्रुमः ॥ (ह्वा०-आत्म०-सक०-अनिट् । ) ओ, हानः । ङ लि, जिहीते । इति दुर्गादासः ॥

हा, व्य, विषादः । शोकः । अर्त्तिः । इत्यमरः । ३ । ४ । २५५ ॥ (यथा, महाभारते ।३।६३।३॥

"हा नाथ ! हा महाराज ! हा स्वामिन् !
किं जहासि माम् ।
हा हतास्मि विनष्टास्मि भीतास्मि विजने वने ॥")

कुत्सा इति मेदिनी ॥

हाङ्गरः, पुं, स्वनामख्यातजलजन्तुः । इति शब्दचन्द्रिका ॥ तत्पर्य्यायः अवहारकशब्दे द्रष्टव्यः ॥

हाटकं, क्ली, ( हटति शोभते इति । हट दीप्तौ+ण्वुल् । ) स्वर्णम् ( यथा, माघे । ११ । ६३ ।

"नवहाटकेष्टकचितं ददर्श स
क्षितिपस्य वस्त्रमथ तत्र संसदि ॥"

अस्य पर्य्यायो यथा,—

"स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम् ।
तपनीयञ्च गाङ्गेयं कलधौतञ्च काञ्चनम् ॥
चामीकरं शातकुम्भं तथा कार्त्तस्वरञ्च तत् ।
जाम्बुनदं जातरूपं महारजत इत्यपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥

हाटकपरिमितः । "जातरूपेभ्यः परिमाणे ।" ४ । ३ । १५३ । इति अण् ॥ ) धुस्तूरः । इत्यमरः । २ । ४ । ७४ ॥ स्वर्णनिर्म्मिते, त्रि ॥

हाटकमयं, त्रि,स्वर्णमयम् । हाटकशब्दात् मयट्-प्रत्ययेन निष्पन्नम् ॥

हाटकेश्वरः, पुं, ( हाटकस्य ईश्वरः । ) गोदावरीतीरस्थशिवः । यथा,—

"एतस्मिन्नन्तरे प्राप्ताः सर्व्वे एवर्षिपार्थिवाः ।
द्रष्टुं त्रैलोक्यभर्त्तारं त्र्यम्बकं हाटकेश्वरम् ॥
ततः कपिवरः प्राप्तो घृताच्या सह सुन्दरि ! ।
स्नात्वा गोदावरीतीर्थे दिदृक्षुर्हाटकेश्वरम् ॥"
इति वामने ६२ अध्यायः ॥

( वितलस्थितो महादेवः । यथा, भागवते । ५ । २४ । १७ । "ततोऽधस्ताद्वितले हरो भगवान् हाटकेश्वरः स्वपार्षदभूतगणावृतः प्रजापतिसर्गोपवृंहणाय भवो भवान्या सह मिथुनीभूयास्ते । यतः प्रवृत्ता सरित्प्रवरा हाटकी नाम भवयोर्वीर्य्येण । यत्रचित्रभानुर्मातरिश्वना समिध्यमान ओजसा पिबति । तन्निष्ठ्यूतं हाटकाख्यं सुवर्णं भूषणेनासुरेन्द्रावरोधेषु पुरुषाः सह पुरुषीभिर्धारयन्ति ॥" )

हातव्यं, त्रि, ( हा+तव्य । ) त्यक्तव्यम् । यथा ।

"हातव्योऽयमसार एव विरसःसंसार इत्यादिकम् ।
सर्व्वस्यैव हि वाचि चेतसि पुनः कस्यापि
पुण्यात्मनः ।"
इति शान्तिशतकम् ॥

हात्रं, क्ली, (हा+ष्ट्रन् ।) वेतनम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ प्रमथनम् । मरणम् । राक्षसः । इति संक्षिप्तसारोणादिवृत्तिः ॥

हानं, क्ली, (हा+क्तः ।) त्यागः । इति जटाधरः ॥

हानिः, स्त्री, (हा+"वहिश्रिश्रुयुद्रुग्लेति ।" उणा० ४ । ५ । इति निः । यद्वा, हा+क्तिन् । "ग्लाम्लाज्याहाभ्यो निः ।"३ । ३ । ९४ । इत्यस्य वार्त्तिकोक्त्या निः । ) क्षतिः । तत्पर्य्यायः । अपहारः २ अपचयः ३ । इति जटाधरः ॥ ( यथा, महाभारते । ५ । ९० । ४ ।

"अश्वामृतं सुरैः पीत्वा निहितं निहतारिभिः ।
अतः सोमस्य हानिश्च वृद्धिश्चैव प्रदृश्यते ॥")

हानुकः, त्रि, घातुकः । इति केचित् ॥

हान्द्रं, क्ली, ( हन+"अमर्जिगमिनमिहनीति ॥" उणा० ४ । १५९ । इति ष्ट्रन् वृद्धिश्च । ) मरणम् । इत्युणादिकोषः ॥

हापुत्रिका, स्त्री, पक्षिविशेषः । तत्पर्य्यायः । सर्पघ्नी २ खञ्जनिका ३ तुलिका ४ स्फोटिका ५ । इति त्रिकाण्डशेषः ॥

हापुत्री, स्त्री, हापुत्रिका । यथा,—

"गोभक्षोरः पङ्ककीरो हापुत्री राजभक्षिका ॥"
इति हारावली ॥

हाफिका, स्त्री, जृम्भा । हाइ इति भाषा । तत्पर्य्यायः । उपपुष्पिका २ । इति हारावली ॥

हायनः, पुं, क्ली, ( जहाति त्यजति जिहीते प्राप्नोति वा भावानिति । हा त्यागे हा गतौ वा+"हय ब्रीहिकालयोः ।" ३ । १ । १४८ । इति ण्युट् । ) वत्सरः । इत्यमरः । १।४।२०॥ ( यथा, भागवते । १ । ६ । ८ ।

"अहञ्च तद्ब्रह्मकुले ऊषिवांस्तदपेक्षया ।
दिग्देशकालाव्युत्पन्नो बालकः पञ्चहायनः ॥")

हायनः, पुं, ( जहात्युदकमिति । हा+"हय ब्रीहिकालयोः ।" ३ । १ । १४८ । इति ण्युट् ।) ब्रीहिभेदः । अग्निशिखा । इति मेदिनी ॥

हारं, त्रि, ( हरेरिदं । हरि+अण् । पक्षे हरतीति । हरं तदेव । हर+स्वार्थे अण् । ) हरिसम्बन्धीयम् । हरणकर्त्तृ । यथा,—

"यच्छृण्वतोऽपैत्यरतिर्व्वितृष्णा
सत्त्वञ्च शुध्यत्यचिरेण पुंसः ।
भक्तिर्हरौ तत्पुरुषे च सख्यं
तदेव हारं वद मन्यसे चेत् ॥"
इति श्रीभागवते । १० । ७२ ॥

"तदेव हारं हरेश्चरितं मनोहरं वा ॥"
इति तट्टीकायां श्रीधरस्वामी ॥

हारः, पुं, ह्रियते मनो येन । हृ+घञ् ।) मुक्तामाला । तत्पर्य्यायः । मुक्तावली २ । इत्यमरः २ । ६ । १०५ ॥ हारा ३ यष्टिः ४ यष्टी ५ लता ६ । इति शब्दरत्नावली ॥ (यथा, कुमारे । ५ । ८ ।

"विमुच्य सा हारमहार्य्यनिश्चया
विलोलयष्टिप्रविलुप्तचन्दनम् ।
बबन्ध बालारुणबभ्रु वल्कलं
पयोधरोत्सेधविशीर्णसंहति ॥"

ह्रियन्ते प्राणा यत्रेति ।) युद्धम् । इति मेदिनी ॥ ( हृ+भावे घञ् । हरणम् । यथा, भागवते । १० । ६३ । १७ ।

"हंस्युत्पथगान् हिंसया वर्त्तमानान्
जन्मैतत्ते भारहाराय भूमेः ॥")

हारकः, पुं, ( हरतीति । हृ+ण्वुल् । ) कितवः । चौरः । गद्यभेदः ॥ विज्ञानविशेषः । इति मेदिनी ॥ शाखोटवृक्षः । इति शब्दचन्द्रिका ॥ भाजकाङ्कः । इति लीलावती ॥ हरणकर्त्तरि, त्रि ॥ ( यथा, मनुः । ११ । ५१ ।

"वस्त्रापहारकः श्वैत्रं पङ्गुतामश्वहारकः ॥")

हारहारा, स्त्री, कपिलद्राक्षा । इति राजनिर्घण्टः ॥

हारहूरः, पुं, मद्यम् । इति हेमचन्द्रः ॥

हारहूरा, स्त्री, द्राक्षा । इति हलायुधः ॥ ( पर्य्यायो यथा,—

"द्राक्षा स्वादुफला प्रोक्ता तथा मधुरसापि च ।
मृद्वीका हारहूरा च गोस्तनी चापि
कीर्त्तिता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ )